vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam • Value Education • Technology

शुद्धिकौमुदी

पाठः ६ – २७.०५.२०१७

रूपलिङ्गवचनादिदोषाः - ४

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

शेषः

२१. हिमालये सर्वत्र **हिमः** एव परिदृश्यते ।

हिमशब्दः नपुंसके । अतः, 'हिमम्' इति प्रयोक्तव्यम् । 'तुषारः तुहिनं हिमम्' इति हि अमरः ।

२२. मम कार्ये **बहूनि विघ्नानि** आगतानि ।

'बहवः विघ्नाः आगताः' इति प्रयोक्तव्यम् । विघ्नशब्दः पुंसि । 'विघ्नोऽन्तरायः प्रत्यूहः' इति अमरः । अतः, तस्य नपुंसकता न भवति कथमपि ।

२३. **पूर्णाः कुक्षिः** यस्य सः पूर्णकुक्षिः ।

'पूर्णः कुक्षिः' इति प्रयोक्तव्यम् । कुक्षिशब्दः पुंसि । 'पिचण्डपक्षी जठरोदरं तुन्दम्' इति अमरः ।

२४. धनिकेन **कम्बलानि** वितीर्णानि ।

’कम्बलाः वितीर्णाः’ इति प्रयोक्तव्यम् । कम्बलशब्दः पुंसि । तथा हि अमरः – ’समौ रल्लककम्बलौ’ ।

---

२५. अरण्ये **कुटीराणि** सन्ति ।

’कुटीराः’ इति प्रयोक्तव्यम् । कुटीरशब्दः पुंसि । ह्रस्वा कुटी + रः – कुटीरः । एषः पुंसि रूढः । विषयेऽस्मिन् कौमुद्याः तत्त्वबोधिनीव्याख्याने प्रामाण्यं यथा – ’कुटीशमीशुण्डाभ्यां रः’ (पा.सू ५.३.८८) स्वार्थिकाः प्रकृतितः लिङ्गम् अतिवर्तन्ते इति पुंलिङ्गं सङ्गच्छते ।

२६. वसन्तऋतुः **उपस्थिता** ।

’उपस्थितः’ इति प्रयोक्तव्यम् । यतः, ऋतुशब्दः पुंसि, न तु स्त्रियाम् । अमरकोषे प्रयोगो यथा – ’ऋतुर्वर्षादिषड्सु च । आर्तवे मासि पुमान्’ ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

शेषः

२७. तस्य **ललाटः** विशालः अस्ति ।

’ललाटं विशालम्’ इति प्रयोक्तव्यम् । ललाटशब्दः नपुंसके । ’भाले गोध्यलिकालीकललाटानि’ इति हैमनाममालायाम् ।

२८. तस्मिन् राज्ये **सुभिक्षा** अवर्तत ।

’सुभिक्षम्’ इति प्रयोक्तव्यम् । सुभिक्षं नाम धान्यसमृद्धिः । तस्मिन् अर्थे नपुंसकता । प्रयोगो यथा –

- सुभिक्षाणि विचित्राणि - पञ्चतन्त्रम् – ४.७८ * सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् – कौमुदी

उत्तरपदे

कानिचन वाक्यानि उत्तरपदत्वेन प्रयुज्यन्ते । तेषां लिङ्गविषये प्रमादः कृतः दृश्यते कदाचित् । अतः ते अत्र उच्यन्ते –

मात्रादयः –

अ. मात्रम् – महाराजस्य एकमात्रः पुत्रः वीरवर्मा ।

अस्य एकमात्रं पुत्रः इति प्रयोक्तव्यम् । मात्रशब्दः नपुंसके । सः नियतलिङ्गः । अतः नपुंसके एव तस्य प्रयोगः । तथा हि

अमरः – 'मात्रं कार्त्स्न्येऽवधारणे' इति ।

मात्रशब्दः त्रिचतुरेषु अर्थेषु प्रयुज्यते । यथा –

- अवधारणार्थे – एकः एव एकमात्रम्, क्षणः एव क्षणमात्रम् ।
- साकल्यार्थे – प्राणिमात्रे न हिंसति ।
- मानार्थे – रेखामात्रम्, कोशमात्रम् ... (अत्र मात्रच्-प्रत्ययः)

उत्तरपदे

आ. **आस्पदम्**– एषः सन्तोषास्पदः विषयः ।

’विषयोऽयं सन्तोषास्पदम्’ इति प्रयोक्तव्यम् ।

आस्पदशब्दः नपुंसके । स च नियतलिङ्गः । अतः, विशेष्यभूते ’विषय’शब्दः पुंसि सत्यपि विशेषणभूतः आस्पदशब्दः नपुंसके एव ।

इ. **प्रायः** – प्रायः पाठः समाप्तप्रायः ।

उत्तरपदत्वेन प्रयुज्यमानः प्रायशब्दः विशेष्यनिघ्नः । अतः, सः विशेष्यस्य लिङ्गानुगुणं रूपभेदं प्राप्नोति । यथा –

- पुंसि – पाठः समाप्तप्रायः । * स्त्रियां – रात्रिः समाप्तप्राया । * नपुंसके – समाप्तप्रायं कार्यम् ।

’प्रायो बाहुल्यतुल्ययोः’ इति कोषात् प्रायशब्दस्य द्वौ अर्थौ । तौ च –

- बाहुल्ये – कमलामोदप्रायाः वनानिलाः । * तुल्ये – अमृतप्रायं वचनम् ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

व्याघ्रपुङ्गवादयः –

अ. व्याघ्र-पुङ्गव-ऋषभ-कुञ्जर-सिंह-शार्दूल-नागादयः उत्तरपदत्वेन प्रयुज्यमानाः श्रेष्ठार्थतां व्यञ्जयन्ति ।

तदवसरे ते स्वार्थं जहति । एते तु पुंसि भवन्ति । उदाहरणानि यथा –

- पुरुषव्याघ्रः * कविपुङ्गवः
- पण्डितर्षभः * कविकुञ्जरः
- पुरुषसिंहः * नरशार्दूलः

एते श्रेष्ठार्थगोचराः इत्यत्र अमरकोषः प्रमाणम् । तथा हि –

स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ इति ॥

एतदत्र स्मर्तव्यं यत् व्याघ्रसिंहादीनां पशुविशेषवाचकत्वम् अत्र नार्थः, अपि तु श्रेष्ठार्थवाचकत्वम् ।

आ. मतल्लिकादयः शब्दाः अपि प्रशस्तवाचकाः सन्ति । तद्यथा –

- प्रशस्तः पुरुषः = पुरुषमतल्लिका
- प्रशस्तः ब्राह्मणः = ब्राह्मणमचर्चिका
- प्रशस्तः मनुष्यः = मनुष्योद्धः
- प्रशस्ता कुमारी = कुमारीतल्लजः
- प्रशस्तः पण्डितः = पण्डितप्रकाण्डम्

मतल्लिकादयः नियतलिङ्गाः । अतः, 'पुरुषमतल्लिका'शब्दः स्त्रीलिङ्गे वर्तमानोऽपि प्रशस्तं पुरुषं (पुमांसं) द्योतयति । एतेषु प्रकाण्डशब्दः नपुंसके अस्ति । एते प्रशस्तवाचकाः इत्यत्र अमरकोषः एव प्रमाणम् । तद्यथा – मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि.... ॥ इति ॥

कथमत्र समासः इत्यत्र सुधाख्या अमरकोषव्याख्या वदति – "मतल्लिकादीनां रूढिशब्दत्वात् 'प्रशंसावचनैश्च' (पा.सू. २.१.६६) इति समासः । कृष्णसर्प-वाप्यश्वादिवदेते नित्यसमासाः । उद्धः तु असमासोऽप्यस्तीति स्वाम्यादयः" इति ।

इ. पुरुषाणां पुङ्गवः अयं सर्वजनप्रियः ।

अत्र 'पुरुषपुङ्गवः' इति समस्तं रूपम् एव प्रयोक्तव्यम् । पुङ्गवशब्दः यदा उत्तरपदं भवति, तदा एव श्रेष्ठार्थवाचकः भवति । समासे अकृते तु तस्य न तादृशं सामर्थ्यम् । अतः, पुङ्गवशब्दस्य श्रेष्ठार्थत्वम् अपेक्ष्यते चेत्, समासः करणीयः एव । अमरकोषोऽपि एतदेव वदति – 'स्युरुत्तरपदे....' इति । चारुदेवशास्त्रिणः अपि स्वीये 'शब्दापशब्दविवेक'ग्रन्थे एतम् एव आशयं पुष्टीकुर्वन्ति ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

चरणपादादयः

- तेन **आचार्यचरणात्** विद्या अधिगृहीता ।
- **आचार्यपादः** शिष्यम् आशीर्वादेन अनुगृहीतवान् ।

'आचार्यचरणेभ्यः', 'आचार्यपादाः' इति बहुवचनान्तं रूपं वक्तव्यम् । चरणपादादयः तत्पुरुषे उत्तरपदत्वेन प्रयुज्यमानाः बहुवचनान्ताः एव पूजार्हतां द्योतयन्ति, न तु एकवचनान्ताः । एतद्विषये वदन्ति वाग्व्यवहारादर्शे चारुदेवशास्त्रिपादाः – 'तत्पुरुषे समास उत्तरपदं चरणशब्दो बहुत्वे वर्तमानः पूजावचनो भवति, न त्वेकत्वे' इति ।

वरसरोवरौ

अ. वरम् – वरशब्दः व्यवहारे बहुधा प्रयुज्यते । विविधाः अर्थाः अपि तस्य । तेषु प्रसिद्धाः –

१) तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः ।

२) जामात्रर्थकः विवाहादिषु प्रयुज्यमानः ।

३) श्रेष्ठः ।

४) मनाक्प्रियम् ।

प्रथमे द्वितीये च अर्थे वरशब्दः पुंसि । तृतीये अर्थे सः विशेष्यनिघ्नः । तन्नाम, त्रिषु वर्तमानः । चतुर्थे अर्थे सः नपुंसकलिङ्गः अव्ययं वा । तथा हि मेदिनी – 'मनागिष्टे वरं क्लीबं केचिदाहुस्तदव्ययम्' इति । अतः, एव किरातार्जुनीये प्रयोगः – 'वरं विरोधोऽपि समं महात्मभिः' इति ।

लौकिकप्रयोगो यथा –

- तस्य सहवासतोऽपि दूरे स्थितिः एव वरम् ।

मनाक्प्रियार्थे वरशब्दः एकवचनान्तोऽपि । (यदा तस्य अनव्ययत्वम् अङ्गीक्रियते तदा)

तद्यथा –

- वरं हि भुक्तानि तृणान्यरण्ये – बुद्धचरितम् १५३

वरसरोवरौ

आ. सरोवरः

सरश्शब्दः नपुंसके इति सर्वेऽपि जानन्ति । सरोवरशब्दः त्रिलिङ्गकः इति पृष्टे 'नपुंसकलिङ्गः' इति वदेयुः बहवः । वस्तुतस्तु सः पुंसि । प्रसिद्धाः वैयाकरणाः चारुदेवशास्त्रिणः वदन्ति – 'पुंसि एव अयं सरोवरशब्दः प्रयुज्यते । लोकाश्रयत्वात् लिङ्गस्य' इति । अतः, 'सरोवरं मया दृष्टम्', 'सरोवरं सुन्दरम् अस्ति' इत्यादयः प्रयोगाः असाधवः भवन्ति ।

’मल्लिकागोपाल’शब्दः पुंसि एव ?

आधुनिके काले महिलानां नामानि श्रूयन्ते –

- मल्लिका गोपाल
- सरस्वती दिवाकर
- वन्दना नागराज इत्यादीनि ।

अत्र मल्लिका-सरस्वती-वन्दनादीनि महिलानां नामानि । ताः आधुनिकं व्यवहारम् अनुसरन्त्यः स्वनाम्ना पत्युः नाम अपि योजयन्ति । ततः ’मल्लिकागोपाल’- ’सरस्वतीदिवाकर’-’वन्दनानागराज’ प्रभृतीनि नामानि सिध्यन्ति । एतानि अखण्डपदानि, प्रकृतिप्रत्ययरहितानि च इति चिन्तनीयं भवति प्रायः ।

’मल्लिकागोपाल’शब्दः पुंसि एव ?

अत्र ’मल्लिका’शब्दोऽपि व्युत्पन्नः । ’गोपाल’शब्दोऽपि तादृशः एव । किन्तु, ’मल्लिकागोपाल’ इति या आनुपूर्वी दृश्यते, तया युक्तं पदं साधयितुम् उपोद्बलकं समासशास्त्रं न किञ्चन अस्ति । अतः, तत्पदस्य प्रकृतिप्रत्ययरहितत्वं चिन्तनीयं स्यात् । तथैव एकव्यक्तिबोधकं तत् पदम् अखण्डम् एव स्यात् । (लेखनावसरे द्वयोः पदयोः मध्ये स्थलावकाशदानात् सखण्डता इति भ्रमः मास्तु । वैशद्यदर्शनाय स्थलावकाशः दर्शितः स्यात् । तावता अखण्डता तु न अपगच्छति) । एवं, ’मल्लिकागोपाल’ इति पदं सिद्धम् । इदानीं प्रश्नः उदेति – ’एतस्य पदस्य किं लिङ्गम्?’ इति । वाच्या व्यक्तिः तु स्त्री । अतः, स्त्रीत्वं मनसि निधाय किं ’मल्लिकागोपाला’ इति आकारान्ततां कुर्याम, उत गोपालशब्दगतं पुंस्त्वं मनसि निधाय ’मल्लिकागोपालः’ इति वदेम ? पुंस्त्वे कृते स्त्रियाः बोधः कथं भवेत् ?

स्त्रीत्वे कृते अन्तिमपदगतं पुंस्त्वं बाधते, पुंस्त्वे कृते तद्वाच्यव्यक्तिगतं स्त्रीत्वं बाधते । एतादृशे स्थले का अवस्था स्यात् भाषायाः ?

’मल्लिकागोपाल’शब्दः पुंसि एव ?

बेङ्गलूरुनगरे निवसन्तः (अधुना दिवङ्गताः) वैयाकरणवरेण्याः श्रीमन्तः रङ्गनाथशर्माणः एतस्य उत्तररूपेण अवदन् –

“पुंस्त्वम् एव युक्तम्” इति । ’कथम्?’ इति पुनः पृष्टाः ते अवदन् –

“लिङ्गव्यवस्था शब्दस्य भवति, न तु अर्थस्य । शब्देन वाच्यस्य अर्थस्य यत्किञ्चित् लिङ्गं स्यात् नाम । शब्दगतं तु लिङ्गं व्याकरणादिविधिम् अनुसरति । गोपालशब्दः पुंसि । अतः, मल्लिकागोपालशब्दोऽपि पुंसि एव स्यात् । तत्पदवाच्या व्यक्तिः स्त्री चेदपि न कापि आपत्तिः । व्यक्तिमित्रादीनि पदानि एव अत्र उदाहरणम्” इति ।

अतः, मल्लिकागोपाल-सरस्वतीदिवाकरादीनां शब्दानां पुंस्त्वं युक्तिसहं भवति ।

अथवा ’मल्लिकागोपाल’ इत्येतत् अव्युत्पन्नः संज्ञापदम् इति अङ्गीकृत्य तस्य स्त्रीत्वविवक्षां मनसि निधाय आकारान्तता अपि अङ्गीकर्तुं शक्या इति अपरस्य वैयाकरणविदुषः मतम् । तदा तु ’मल्लिकागोपाला’ इत्यपि रूपम् ।

भारतीसरस्वत्यन्तादीनां पदानां किं लिङ्गम् ?

लोके ये मठाधिपतयः भवन्ति, तेषां नामानि – '........भारती', '......सरस्वती' इत्येवमादिरूपेण श्रूयन्ते । एतादृशानां भारतीसरस्वत्यन्तादीनां पदानां किं लिङ्गं स्यात् ?

वाच्यस्य अर्थस्य पुंस्त्वं तु स्फुटमेव । शब्दस्य अन्ते श्रूयमाणानां भारतीसरस्वत्यादीनां पदानां स्त्रीत्वं लोके प्रसिद्धम् । एवं स्थिते भारत्याद्यन्तानां किं लिङ्गं स्यात् ?

पूर्वोक्ता शास्त्रयुक्तिः एव अत्रापि स्मरणीया । पदगतस्य लिङ्गस्यैव प्राधान्यं भवति अत्र । अतः, भारतीसरस्वत्यन्तानि ईकारान्तानि स्त्रीलिङ्गानि एव इति निर्णयः ।

एतदत्र स्मर्तव्यं यत् लिङ्गविषयकचर्चावसरे भारत्यन्तानि परिगृहीतानि । तानि च नामानि गृहीतसंन्यासानां मठाधीशानां भवन्ति प्रायः । तेषां निर्देशावसरे **बहुवचनप्रयोगः एव शिष्टसम्मतः** । अतः, '..............भारतीस्वामिनः' इति बहुवचनप्रयोगः एव युज्यते, न त्वेकवचनप्रयोगः । शब्दप्रयोगावसरे शब्दगता लिङ्गव्यवस्था एव अनुसरणीया, न तु तद्वाच्यार्थगता लिङ्गव्यवस्था इति तु सारः ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma ॥ वाचं धेनुमुपासीत ॥

Saṃskṛtam • Value Education • Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.